नामांक Roll No.

Question Booklet No.

No. of Questions – 19

No. of Printed Pages – 11

**SS-12-Sanskrit Sah.**

# उच्च माध्यमिक पूरक परीक्षा, 2026

# SENIOR SECONDARY SUPPLEMENTARY EXAMINATION, 2026

# संस्कृतसाहित्यम्

**समय : 3:15 (सपादत्रिवादनम्)**

**पूर्णाङ्क : 80**

**परीक्षार्थिभ्य: सामान्य निर्देशा:**

1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामांक: **अनिवार्यत:** लेख्य: ।

2) **सर्वे** प्रश्ना: अनिवार्या: ।

3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

## खण्डः – 'अ'

**1.** बहुविकल्पात्मकप्रश्नाः । **[1×12=12]**

i) 'रघुकौत्ससंवादः' इति पाठः कस्मात् ग्रन्थात् सङ्कलितः ? **[1]**

अ) रामायणात् ब) रघुवंशात्

स) महाभारतात् द) शिवराजविजयात्

ii) उत्पथैः कस्य मनः पारिप्लवं धावति ? **[1]**

अ) लवस्य ब) कौशल्यायाः

स) रामस्य द) जनकस्य

iii) कर्मणा के सिद्धिम् आस्थिताः ? ('कर्मगौरवम्' पाठानुसारेण) **[1]**

अ) जनकादयः ब) अर्जुनादयः

स) कृष्णादयः द) भीमादयः

iv) लब्धापि दुःखेन का परिपाल्यते ? **[1]**

अ) पत्नी ब) बुद्धिः

स) लक्ष्मीः द) शक्तिः

v) अपण्डितानां विभूषणं किम् अस्ति ? **[1]**

अ) ज्ञानम् ब) बलम्

स) रूपम् द) मौनम्

vi) समुद्रः राज्ञे विक्रमाय किं दत्तवान् ? **[1]**

अ) षड्रसभोजनम् ब) रत्नचतुष्टयम्

स) प्रभूतं धनम् द) अखण्डं साम्राज्यम्

vii) श्रीनायारः केन्द्रसर्वकारतः स्थानान्तरेण आगत्य कुत्र कार्यं करोति ? **[1]**

अ) ओडिशासर्वकारस्य अधीने ब) राजस्थानसर्वकारस्य अधीने

स) केरलसर्वकारस्य अधीने द) हरियाणासर्वकारस्य अधीने

viii) कः गणः त्रिगुरुः भवति ? [1]

अ) यगणः ब) मगणः

स) नगणः द) सगणः

ix) 'एचोऽयवायावः' इति सूत्रस्य उदाहरणं किम् ? [1]

अ) यद्यपि ब) विद्यालयः

स) नायकः द) रमेशः

x) 'उत् + ज्वलः = उज्ज्वलः' इत्यत्र कः सन्धिः अस्ति ? [1]

अ) श्चुत्व ब) ष्टुत्व

स) अनुस्वार द) जश्त्व

xi) 'मधु + अरिः = मध्वरिः' इत्यत्र सन्धेः सूत्रं किम् ? [1]

अ) इकोयणचि ब) एचोऽयवायावः

स) झलां जशोऽन्ते द) एङः पदान्तादति

xii) कस्मिन् अलङ्कारे वर्णसाम्यं भवति ? [1]

अ) उपमायाम् ब) रूपके

स) अनुप्रासे द) यमके

**2.** कोष्ठकेषु प्रदत्तनिर्देशानुसारं रिक्तस्थानानि पूरयत । [1×5=5]

i) ते न अल्पम् अपि ________ अस्ति । (उप् + दिश् + तव्यत्) [1]

ii) भवान् यज्ञदक्षिणाकालं व्यतिक्रम्य ________ । (सम् + आ + गम् + क्त) [1]

iii) श्रीनायारः पत्रमेकं ________ पठन् आसीत् । (धृ + क्त्वा) [1]

iv) अशक्तो हि ________ कर्म परमाप्नोति । (आङ् + चर् + शतृ) [1]

v) "एकवारमपि ________ प्रति गमनाय इच्छां न प्रकटितवान् ।" अत्र 'केरल' शब्दे उचितं विभक्तिं संयोज्य लिखत । [1]

3. अधोलिखितान् रेखाङ्कितशब्दान् आधारीकृत्य विभक्तिं तत्कारणञ्च लिखत । [1×2=2]

क) तस्य राज्येन सह कश्चित् सम्पर्कः नास्ति । [1]

ख) गणेशाय नमः । [1]

4. अधोलिखितपद्यांशे अलङ्कारस्य नामोल्लेखं कुरुत ।

'निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ।' [1]

## खण्डः – 'ब'

5. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत । [2×4=8]

क) कालिदासेन रचितानि कति महाकाव्यानि ? नामानि लिखत । [2]

ख) 'श्रीमद्भगवद्गीताग्रन्थः' कस्माद् महाकाव्यात् सङ्कलितः ? तस्मिन् ग्रन्थे कति श्लोकाः च सन्ति ? [2]

ग) 'शिवराजविजयम्' उपन्यासस्य प्रणेता कः ? तस्य नायकस्य नाम लिखत । [2]

घ) i) 'तदेव गगनं सैव धरा' कवितासंग्रहः केन रचितः ? [2]

ii) 'भवानी भारती' खण्डकाव्यस्य प्रणेता कः ?

6. अधोलिखितयोः छन्दसोः **एकस्य** छन्दसः लक्षणमुदाहरणञ्च लिखत । [2]

क) वंशस्थम्

ख) मन्दाक्रान्ता

7. अधोलिखितयोः पद्यांशयोः **एकस्य** गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरुत । [2]

क) सति च कुलविरोधे नापराधयन्ति बालाः ।

ख) त्वमेव माता च पिता त्वमेव ।

8. अधोलिखितस्य श्लोकस्य अन्वयं लिखत । [2]

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।

9. अधोलिखितयोः पद्यांशयोः **एकस्य** हिन्दीभाषायां सप्रसंङ्ग भावार्थं लिखत । [2]

क) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।

ख) तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ।

**10.** अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

जनयो: जनानां वा मध्ये विचाराणां भावनानां सूचनानां वा विनिमय: सञ्चार: कथ्यते । विचाराणां भावनानां सूचनानां वा परस्परमादानप्रदानाय यत् साधनं प्रयुज्यते तत् सञ्चारसाधनं भवति । मानव सभ्यताया: आरम्भकाले यदा भाषा विकसिता नासीत् तदानीं भावप्रेषणाय संकेतानां ध्वनिचिह्नानां वा प्रयोगो भवति स्म । शनै: शनै: भाषा विकसिता जाता । जना: भाषामाध्यमेन परस्परं सम्पर्कं भावप्रेषणं वा कुर्वन्ति स्म । भाषा एव सञ्चारस्य प्रमुखं साधनमासीत् ।

परमाधुनिके युगे सञ्चारसाधनानां तीव्रविकासेन मानवजीवने एका विस्मयकरी क्रान्तिरेव प्रावर्तत् । टंकणमुद्रण-साधनानां टंकणयन्त्राणां मुद्रणयन्त्राणां च विकासेन मुद्रितपुस्तकानां समाचार पत्र-पत्रिकादीनां च माध्यमेन सम्पूर्णस्य विश्वस्य मनोभावा: वार्ताश्च पठितुं शक्यन्ते ।

क) एकपदेन उत्तरत । **[1×2=2]**

i) मानवसभ्यताया: प्रारम्भकाले भावप्रेषणाय कस्य प्रयोग: भवति स्म ? **[1]**

ii) शनै: शनै: का विकसिता जाता ? **[1]**

ख) पूर्णवाक्येन उत्तरत । **[2]**

विश्वस्य मनोभावा: केन पठितुं शक्यन्ते ?

ग) भाषासम्बद्धकार्यम् । **[1×3=3]**

i) 'कथ्यते' इति क्रियाया: कर्तृपदं किम् ? **[1]**

ii) 'परम् आधुनिके युगे' अत्र विशेषणपदं किम् ? **[1]**

iii) 'आश्चर्यकरी' इत्यस्य पर्यायपदं गद्यांशात् चित्वा लिखत । **[1]**

घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । **[1]**

## <u>खण्ड: – 'स'</u>

**11.** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

भवादृशा एव भवन्ति भाजनान्युपदेशानाम् । अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणा: । हरति च अतिमलिनमपि दोषजातं गुरूपदेश:, गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम् । विशेषेण तु राज्ञाम् । विरला हि तेषाम् – उपदेष्टार: । राजवचनमनुगच्छति जनो भयात् ।

क) एकपदेन उत्तरत । **[1]**

उपदेशगुणा: कुत्र विशन्ति ?

ख) पूर्णवाक्येन उत्तरत । [2]
अजलं स्नानं किम् ?

ग) भाषिककार्यम्–(शुद्धम् उत्तरं चित्वा लिखत) [1×2=2]

i) 'विरला हि तेषाम् उपदेष्टार:' अत्र 'तेषाम्' । [1]
सर्वनामपदस्य संज्ञापदं किम् ?
अ) जनानाम् ब) राज्ञाम्
स) अतिमलिनानाम् द) विरलानाम्

ii) 'अतिमलिनम्' इति विशेषणस्य अत्र विशेष्यपदं किम् ? [1]
अ) गुरूपदेश: ब) हरति
स) दोषजातम् द) स्नानम्

**अथवा**

तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि । एतेषां महात्म्यम् एकं रत्नं यद्वस्तु स्मर्यते तद् ददाति । द्वितीयेन रत्नेन भोजनादिममृततुल्यमुत्पद्यते । तृतीयरत्नात् चतुरङ्गबलं भवति । चतुर्थाद् रत्नाद् दिव्याभरणानि जायन्ते । तदेतानि रत्नानि गृहीत्वा राज्ञो हस्ते प्रयच्छेति ।

क) एकपदेन उत्तरत । [1]
राज्ञे व्ययार्थं किं ददाति

ख) पूर्णवाक्येन उत्तरत । [2]
कस्मात् दिव्याभरणानि जायन्ते ?

ग) भाषिककार्यम् – (शुद्धम् उत्तरं चित्वा लिखत) [1×2=2]

i) 'तद् एतानि रत्नानि गृहीत्वा' अत्र विशेष्यपदं किम् ? [1]
अ) तद् ब) एतानि
स) रत्नानि द) गृहीत्वा

ii) 'करे' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत । [1]
अ) हस्ते ब) रत्नेन
स) राज्ञे द) तस्मै

**12.** अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व, योगः कर्मसु कौशलम् ।

क) एकपदेन उत्तरत । **[1]**

कर्मसु कौशलं किम् ?

ख) पूर्णवाक्येन उत्तरत । **[2]**

सुकृतदुष्कृते कः जहाति ?

ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत) **[1×2=2]**

i) 'उभे' सर्वनामपदस्य संज्ञापदं किम् ? **[1]**

अ) बुद्धियुक्तः ब) जहातीह
स) सुकृतदुष्कृते द) युज्यस्व

ii) 'त्यजति' इति क्रियापदस्य पर्यायपदं किम् ? **[1]**

अ) जहाति ब) युज्यस्व
स) तस्मात् द) कौशलम्

**अथवा**

विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम् ।।

क) एकपदेन उत्तरत – **[1]**

महान् जनः अभ्युदये किं करोति ?

ख) पूर्णवाक्येन उत्तरत – **[2]**

'यशसि' केषाम् अभिरुचिः भवति ?

ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत) । **[1×2=2]**

i) 'प्रकृतिसिद्धम् इदं हि महात्मनाम् ।' अत्र सर्वनामपदं किम् ? **[1]**

अ) प्रकृतिसिद्धम् ब) इदम्

स) हि द) महात्मनाम्

ii) 'सम्पदि' इति पदस्य विलोमपदं किम् ? **[1]**

अ) विपदि ब) प्रकृतिः

स) धैर्यम् द) युधि

**13.** अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

लवः – (प्रविष्य, स्वगतम्) अविज्ञातवयः क्रमोचित्यात् पूज्यानपि सतः कथमभिवादयिष्ये ? (विचिन्त्य) अयं पुनरविरुद्धप्रकार इति वृद्धेभ्यः श्रूयते । (सविनयमुपसृत्य) एष वो लवस्य शिरसा प्रणामपर्यायः ।

अरुन्धतीजनकौ – कल्याणिन् आयुष्मान् भूयाः ।

कौशल्या – जात ! चिरं जीव ।

अरुन्धती – एहि वत्स (लवमुत्सङ्गे गृहीत्वा आत्मगतम्) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरितः ।

क) एकपदेन उत्तरत । **[1]**

"जात ! चिरं जीवा" इति कस्य कथनम् ?

ख) पूर्णवाक्येन उत्तरत । **[2]**

कस्य मनोरथः पूरितः ?

ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत) **[1×2=2]**

i) 'अविरुद्धप्रकार इति वृद्धेभ्यः श्रूयते ।' अत्र क्रियापदं किम् ? **[1]**

अ) अविरुद्धप्रकारः ब) इति

स) वृद्धेभ्यः द) श्रूयते

ii) 'सौभाग्येन' इति पदस्य पर्यायपदं किम् ? [1]

अ) एहि  ब) दिष्ट्या

स) एष:  द) वत्स:

**अथवा**

स्वप्निल: – बलराम ! अद्य कक्षायां कोऽपि विशिष्ट: कार्यक्रम: ?

बलराम: – अरे मित्र ! त्वं न जानासि ? इदानीं तु योगशिक्षाया: कालांश: ।

मोहिनी – एष: तु नूतन: विषय: । किं प्रतिदिनम् ईदृशी कक्षा प्रचलिष्यति ?

बलराम: – आम्; अधुना तु अस्माकं कृते योगशिक्षा अतीव उपयोगिनी अस्ति ।

सागरिका – अहो ! सुखदमाश्चर्यम् । अहमपि गृहे मातु: मुखाद् योगशिक्षाया: विषये श्रुतवती । तया उक्तम् – 'योग: स्वास्थ्यकर: ।'

क) एकपदेन उत्तरत । [1]

नूतन: विषय: क: ?

ख) पूर्णवाक्येन उत्तरत । [2]

सागरिकाया: माता किम् उक्तवती ?

ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत) [1×2=2]

i) अरे मित्र ! त्वं न जानासि ? अत्र सर्वनामपदं किम् ? [1]

अ) अरे  ब) मित्र

स) त्वम्  द) जानासि

ii) 'प्रतिदिनम् ईदृशी कक्षा प्रचलिष्यति' अत्र कर्तृपदं किम् अस्ति ? [1]

अ) प्रचलिष्यति  ब) कक्षा

स) ईदृशी  द) प्रतिदिनम्

**14.** रेखाङ्कितपदेषु प्रश्ननिर्माणं कुरुत । (केषाञ्चित् **त्रयाणाम्**) **[1×3=3]**

क) तस्मिन् अपो मातरिश्वा दधाति ।

ख) कौत्स: वरतन्तो: शिष्य: आसीत् ।

ग) मरालस्य मानसं मानसं विना न रमते ।

घ) षड्विधं प्रीतिलक्षणं भवति ।

ङ) विधात्रा विभूषणं विनिर्मितम् ।

**15.** 'शुकनासोपदेश:' अथवा 'विक्रमस्योदार्यम्' पाठस्य सारं हिन्दीभाषायां लिखत । **[3]**

**16.** अधोलिखितयो: अलङ्कारयो: कस्यचि**देकस्य** लक्षणम् उदाहरणं च लिखत । **[3]**

क) यमकम्

ख) उपमा ।

**खण्ड: – 'द'**

**17.** प्रदत्तरूपरेखया कथासंयोजनं कृत्वा लिखत । **[4]**

एक: काक: ____________ तृषित: ____________ जलं न आसीत् ____________ क्षेत्रं गच्छति ____________ एकं घटं ____________ तत्र अल्पं ____________ चिन्तयति ____________ उपायं करोति ____________ आनयति ____________ उपरि आगच्छति ____________ जलं पिबति ____________ प्रसन्न: भवति ।

**अथवा**

अधोलिखितानि क्रमरहितवाक्यानि समुचितक्रमानुसारं लिखत । **[4]**

क) साधुपुरुष: वारं वारं प्रयासं कृत्वा तं गङ्गातीरे स्थापयति ।

ख) स: साधो: हस्तात् जले अपतत् ।

ग) य: अपकारिणाम् अपि उपकारं करोति स: एव साधु: भवति ।

घ) गङ्गातीरे एक: साधु: आसीत् ।

ङ) एकस्मिन् दिने नदीप्रवाहे एकं वृश्चिकं दृष्टवान् ।

च) वृश्चिकः तस्य हस्तम् अदशत् ।

छ) तं हस्तेन गृहीत्वा तीरे स्थापयितुं प्रयत्नं कृतवान् ।

ज) प्रतिदिनं सः गङ्गानद्यां स्नानं करोति स्म ।

**18.** निम्नलिखितयोः कमपि विषयं स्वीकृत्य **50-60** शब्देषु संस्कृतभाषां निबन्धं लिखत । **[4]**

क) परोपकारः

ख) संस्कृतभाषायाः महत्त्वम् ।

**19.** अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादः करणीयः । (केषाञ्चि **चतुर्णाम्**) **[1×4=4]**

क) रामायण में सात काण्ड हैं ।

ख) गङ्गा का जल पवित्र है ।

ग) सत्य की ही विजय होती है ।

घ) ये आम मीठे हैं ।

ङ) रक्षापुरुष चोर से रक्षा करता है ।

च) चरित्र की यत्नपूर्वक रक्षा करनी चाहिए ।

---

DO NOT WRITE ANYTHING HERE